अप्रदेशः १३ प्रकृतिः १४ पृथ्वी १५ संसारमार्गः १६ गुह्यम् १७ स्मरागारम् १८ स्मरध्वजम् १९ रत्नाङ्गम् २० रतिकुहरम् २१ कलत्रम् २२ अधः २३ । इति शब्दरत्नावली ॥ तस्य लक्षणम् । यथा,—

"विस्तीर्णश्च गभीरश्च द्विविधं भगलक्षणम् ।"

तद्गुणा यथा,—

"कूर्म्मपृष्ठं गजस्कन्धं पद्मगन्धं सुकोमलम् ।
अकोमलं सुविस्तीर्णं पञ्चैते च भगोत्तमाः ॥"

तद्दोषा यथा,—

"शीतलं निम्नमुग्रं गोजिह्वासदृशं परम् ।
इत्युक्तं कामशास्त्रज्ञैर्भगदोषचतुष्टयम् ॥
विस्तीर्णे सुफलं योज्यं गभीरे वंशबीजकम् ।"
इति रतिमञ्जरी ॥

तस्य शुभाशुभलक्षणम् । यथा,—

"शुभः कमठपृष्ठाभो गजस्कन्धोपमो भगः ।
वामोन्नतस्तु कन्याजः पुत्रजो दक्षिणोन्नतः ॥
आखुरोमा गूढमणिः श्लिष्टः संहतः पृथुः ।
तुङ्गः कमलवर्णाभः शुभोऽश्वत्थदलाकृतिः ॥
कुरङ्गखुररूपो यश्चुल्लिकोदरसन्निभः ।
रोमशो विवृतास्यश्च दृश्यनासोऽतिदुर्भगः ॥
शङ्खावर्त्तो भगो यस्याः सा गर्भमिह नेच्छति ।
चिपिटः कर्परकारः किङ्करीप्रदो भगः ॥
वंशवेतसपत्राभो गजरोमोच्चनासिकः ।
विकटः कुटिलाकारो लम्बगल्लस्तथाशुभः ॥"
इति स्कान्दे काशीखण्डे ३७ अध्यायः ॥

श्रीः । वीर्य्यम् । इच्छा । ज्ञानम् । वैराग्यम् । कीर्त्तिः । माहात्म्यम् । ऐश्वर्य्यम् । ( यथा, भागवते । २ । ७ । ६ ।

"यद्वेणसुत्पथगतं द्विजवाक्यवज्र-
निष्प्लुष्टपौरुषभगं निरये पतन्तम् ॥"

"निष्प्लुष्टं दग्धं पौरुषं भगमैश्वर्य्यञ्च यस्य ।" इति तट्टीकायां स्वामी ॥ ) यत्नः । धर्म्मः । मोक्षः । इति मेदिनी । गे,१४ ॥ पुंसां गुदमुष्कमध्यभागः । इति राजनिर्घण्टः ॥ श्रीः । यशः । सौभाग्यम् । (यथा, भागवते । १ । १७ । १० ।

"यस्य राष्ट्रे प्रजाः सर्व्वास्त्रस्यन्ते साध्व्यसाधुभिः ।
तस्य मत्तस्य नश्यन्ति कीर्त्तिरायुर्भगो गतिः ॥"

"भगो भाग्यम् ।" इति तट्टीकायां स्वामी ॥) कान्तिः । सूर्य्यः । शम्भुविशेषः । चन्द्रः । इत्यनेकार्थध्वनिमञ्जरी ॥ पूर्व्वफल्गुनीनक्षत्रम् । यथा, ज्योतिस्तत्त्वे ।

"अचलतामयुक्ताश्च भगे सर्पिस्तदुत्तरे ॥"

**भगः**, पुं, ( भज्यते इति । भजसेवायां + "पुंसि संज्ञायां घ प्रायेण ।" ३ । ३ । ११८ । इति घ । "खनो घ च ।" ३ । ३ । १२५ । इति चित्करणाद् वा घ । ) रविः । इति मेदिनी ॥ गे, १४ । क्लीवेऽव्ययम् । यथा,—

"ज्ञानवैराग्ययोर्योनौ भगमस्त्री तु भास्करे ।"
इति रुद्रः ॥"

( भजनीये, त्रि । यथा, ऋग्वेदे । ३ । ३६ । ५ ।

"इन्द्रो भगो वाजदा अस्य गावः
प्रजायन्ते दक्षिणा अस्य पूर्व्वीः ॥"

"भगः सर्व्वैर्भजनीयः स इन्द्रः ।" इति तद्भाष्ये सायनः ॥ द्वादशादित्यभेदः । यथा, ऋग्वेदे । २ । २७ । १ ।

"इमा गिर आदित्येभ्यो घृतस्नूः
सनाद्राजभ्यो जुह्वा जुहोमि ।
शृणोतु मित्रो अर्य्यमा भगो नस्तुवि
जातो वरुणो दक्षो अंशः ॥"

यथा च महाभारते । १ । ६५ । १५-१६ ।

"धाता मित्रोऽर्य्यमा शक्रो वरुणस्त्वंश एव च ।
भगो विवस्वान् पूषा च सविता दशमस्तथा ॥
एकादशस्तथा त्वष्टा द्वादशो विष्णुरुच्यते ।
जघन्यजस्तु सर्व्वेषामादित्यानां गुणाधिकः ॥"

रुद्रांशो वीरभद्रोऽस्य भगस्य दक्षयज्ञे नेत्रे उत्पाटितवान् । यथा, भागवते । ४ । ५ । १८ ।

"भगस्य नेत्रे भगवान् पातितस्य रुषा भुवि ।
उज्जहार सदस्थोऽक्ष्णा यः शपन्तमसूसुचत् ॥"

ऐश्वर्य्यादिषट्कम् । यदुक्तम् ।

"ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षसां भग इतीङ्गना ॥"

भोगास्पदत्वम् । यथा, भागवते ।१।१६।२६।

"प्रागल्भ्यं प्रश्रयः शीलं सह ओजो बलं भगः ।
गाम्भीर्य्यं स्थैर्य्यमास्तिक्यं कीर्त्तिर्मानोऽनहंकृतिः ॥"

"भगः भोगास्पदत्वम् ।" इति तट्टीकायां श्रीधरस्वामी ॥ स्थूलमण्डलाभिमानी । यथा, रामायणे । ३ । १२ । १८ ।

"विष्णोः स्थानं महेन्द्रस्य स्थानञ्चैव विवस्वतः ।
सोमस्थानं भगस्थानं स्थानं कौवेरमेव च ॥"

"भगः स्थूलमण्डलाभिमानी ।" इति तट्टीकायां रामानुजः ॥)

**भगणः**, पुं, ( भानां नक्षत्राणां गणः समूहः । ) नक्षत्रसमूहः । शीघ्रगामिनां ग्रहाणामल्पेन कालेन मन्दगामिनां ग्रहाणां महता कालेन पूर्व्वगत्या पातानां पश्चिमगत्या परिवर्त्तनेनाश्विन्यादिरेवत्यन्तनक्षत्रभोगकालः । षष्टिविकलाभिः कला षष्टिकलाभिर्भागस्त्रिंशभागैराशिर्द्वादशराशिभिर्भगणः । यथा,—

"शीघ्रगस्त्वन्यथाल्पेन कालेन महताल्पगः ।
तेषान्तु परिवर्त्तेन पौष्णान्ते भगणः स्मृतः ॥
विकलानां कला षष्ट्या तत्षष्ट्या भाग उच्यते ।
तत्त्रिंशता भवेद्राशिर्भगणो द्वादशैव ते ॥
युगे सूर्य्यज्ञशुक्राणां खचतुष्करदार्णवाः
४३२०००० ।
कुजार्किगुरुशीघ्राणां भगणाः पूर्व्वयायिनाम् ॥
इन्दो रसाग्निचित्रीषुसप्तभूधरमार्गणाः
५७७५३३३६ ।
दस्रत्र्यष्टरसाङ्काक्षिलोचनानि कुजस्य तु
२२९६८३२ ॥
बुधशीघ्रस्य शून्यर्त्तुखाद्रित्र्यङ्कनगेन्दवः
१७९३७०६० ।
बृहस्पतेः खदस्राक्षिवेदषड्वह्नयस्तथा
३६४२२० ॥
सितशीघ्रस्य षट्सप्तत्रियमाश्विखभूधराः
७०२२३७६ ।
शनेर्भुजङ्गषट्पञ्चरसवेदनिशाकराः १४६५६८ ॥
चन्द्रोच्चस्याग्निशून्याश्विवसुसर्पार्णवा
४८८२०३ युगे ।
वामं पातस्य सर्पाग्नियमाश्विशिखिदस्रकाः
२३२२३८ ॥
इति सूर्य्यसिद्धान्तः ॥ * ॥

अपि च । ग्रहाणां मन्दोच्चानां चलोच्चानां ग्रहपातानाञ्च भगणान् श्लोकषट्केनाह ।

अर्कशुक्रबुधपर्य्यया विधेरह्नि कोटिगुणिता रदाब्धयः । ४३२०००००० एत एव शनिजीवभूभुवां कीर्त्तिताश्च गणकैश्चलोच्चजाः ॥ १ ॥ खाभ्रखाभ्रगगनामरेन्द्रियक्ष्माधराद्रिविषया ५७७५३३००००० हिमद्युतेः । युग्मयुग्मशरनागलोचनव्यालषस्वयमाश्विनोऽसृजः २२९६८२८५२२ ॥ २ ॥ सिन्धुसिन्धुरनवाष्टगोऽङ्कषट्त्र्यङ्कसप्तशशिनो १७९३६९९८९८४ ज्ञशीघ्रजाः । पञ्चपञ्चयुगषट्कलोचनद्व्यब्धिषड्गुणमिता ३६४२२६४५५ गुरोर्मताः ॥ ३ ॥ द्विनन्दवेदाङ्कगजाग्निलोचनद्विशून्यशैलाः ७०२२३८९४९२ सितशीघ्रपर्य्ययाः । भुजङ्गनन्दद्विनगाङ्गबाणषट्कृतेन्दवः सूर्य्यसुतस्य पर्य्ययाः १४६५६७२२९८ ॥ ४ ॥ खाष्टाब्धयो४८०ऽष्टाष्टगजेषुदिग्वियद्विपाब्धयो ४८०१०५८५८ द्व्यङ्कयमा २९२ रदाग्नयः३३२ । शरेष्विभा८५५ स्त्र्यष्टरसाः६५३ कुसागराः४१ स्युः पूर्व्वगत्या तरणेन्दुच्चजाः ॥ ५ ॥ गजाष्टिभर्गाच्चिरदाश्विनः२३२३११६८ कुभ्रदस्राश्विनः२९७ कुद्विशराः ५२१ क्रमर्णवः ६३ । त्रिनन्दनागा ८९३ युगकुञ्जरेषवो ५८४ निशाकराद्यस्तगपातपर्य्ययाः ॥ ६ ॥"
इति सिद्धान्तशिरोमणिः ॥*॥

ग्रहाणां पूर्व्वगमनेन कल्पे एते पर्य्ययाः । तथा मन्दोच्चानाञ्च प्राग्गत्या एतावन्तः । पातानां पश्चिमगत्या एतावन्तो भवन्ति । अत्रोपपत्तिः सा तु तद्भाषाकुशलेन तत्त्रैत्रसंस्थानज्ञेन स्रुतगोलेनैव श्रोतुं शक्यते नान्येन । ग्रहमन्दशीघ्रपाताः स्वस्वमार्गे गच्छन्त एतावतः पर्य्ययान् कल्पे कुर्व्वन्तीत्यत्रागम एव प्रमाणम् । इति तट्टीका ॥

**भगदत्तः**,पुं,(भगमैश्वर्य्यं दत्तमस्मै इति।) नरकराजस्य ज्येष्ठपुत्रः । स तु प्राग्ज्योतिषपुराधिपः । यथा,

"ऋतुमत्यान्तु जायायां कालेन नरकः क्रमात् ।
भगदत्तं महाशीर्षं मदवन्तं सुमालिनम् ॥
चतुरो जनयामास पुत्त्रांस्तांश्च क्षितेः सुत ।"

श्रीभगवानुवाच ।

"भारावतरणे देवि ! नरकस्य वधः पुरा ।
त्वयैव प्रार्थितो यस्मात् तेनासौ निहतो मया ॥